योगाच्च । यत्तु गौर्ज्ञायते गौर्नश्यति सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनानन्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्य्यानुपपत्तेरपि लक्षणाया वीजत्वात् यदाहुर्मण्डनाचार्य्याः “जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति । नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे” इति तदपि तुच्छं व्यक्तिविनाकृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तन्मात्रस्याशक्यत्वे तद्वति गवादौ लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात् । न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेद्यत्वसम्बन्धेन शुद्धस्य गोत्वादेरन्वयात्तथाविधस्थल एव जातौ मुख्यप्रयोगः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिष्ठगोत्वावच्छेद्यत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भक्तिशक्तिभ्यां गोपदेन बोधने वृत्तिद्वययौगपद्यापत्तेः वस्तुतः शुद्धस्य गोत्वादेः शाब्दधीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयोदुर्घटः एव द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्घटत्वजातेर्नानात्वोपगमादिति” ।

ततः परं प्रागुपदर्शितं प्राभाकरमतमुत्थाप्य दूषितं यथा

“शाब्दमतेर्गवादिव्यक्त्यवगाहित्वमवश्यङ्कारणप्रयोज्यं जन्यधीविषयतायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षधर्मिकसाध्यावगाहितादेरपि परामर्शादिप्रयोज्यता न स्यादनुमित्यादि सामान्यं प्रत्येव ज्ञानत्वादिना हेतुत्वस्य लाघवेनौचित्यात् पक्षतादिसहकृतपरामर्शाद्युत्तरज्ञानस्य तत्प्रकाशस्यैव वा पक्षे साध्यावगाहित्वनियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः । किञ्च गोत्वशक्यत्वं न गोत्वसमर्थत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात् नापि तद्गोचरमभिधानात्मकं पदार्थान्तरं तत्र मानाभावात् न वा गोत्वानुभवजनकत्वं पटादिपदस्यापि गोत्वशक्यत्वापत्तेस्तस्यापि गवादिपदाकाङ्क्षादिसाचिव्येन गोत्वानुभवजनकत्वात् न च गोत्वानुभवसामान्यं प्रति हेतुत्वन्तथा गवादिपदेऽप्यसत्त्वात् नापि गोत्वानुभवजनकत्वप्रकारकनित्यसङ्केतवत्त्वं तादृशसङ्केतवत्त्वमात्रं वा गोत्वशक्तत्वमिति साम्प्रतं, गोपदं गोत्वेन गवानुभवस्य जनकतया न सङ्केतितमित्यादिग्रहेऽपि तस्य ग्रहाद्गोत्वेन गोरन्वयधीप्रसङ्गात् किन्तु गोत्वेन गवानुभवस्य जनकतया सङ्केतितत्वं तथा, तथा च पदधर्मिकतज्ज्ञानत्वेन गोत्वप्रकारकशाब्दं प्रति हेतुतायां गोत्वस्येव तद्विशिष्टस्य गोरपि विषयविधयावच्छेदकत्वादवश्यं गोत्वादिविशिष्टो गवादिर्गवादिपदस्यार्थः” ।

**जातिशब्द** पु० जातिवाचकः शब्दः । प्रकारविधया विशेष्यविधया वा जातिवाचके शब्दे हंसमृगादिशब्दादौ । “चिह्नैर्व्यक्तैर्भवेद्व्यक्तो जातिशब्दोऽपि वाचकः” हेमच० ।

**जातिशस्य** न० ६त० । (जायफल) सुगन्धद्रव्यभेदे शब्दार्थचि० ।

**जातिसङ्कर** पु० जात्योर्विरुद्धयोः सङ्करः । परस्परविरुद्धयोः (परस्पराभावसमानाधिकरणयोः) १जात्योरेकत्र समावेशे स च जातिशब्दे जातिवाधकतया वैशेषिकसूत्रोपस्कारे प्रदर्शितः । २वर्णसङ्करे विभिन्नजातिकाभ्यां मातापितृभ्यां सङ्कीर्णवर्णे च यथा मूर्द्धावसिक्ताम्बष्ठादि ।

**जातिसार** न० ६त० । (जायफल) ख्याते पदार्थे राजनि० ।

**जातिस्फोट** पु० व्याकरणमतसिद्धे स्फोटभेदे वैयाकरणभूषणसारे हि वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखण्डपदवाक्यस्फोटौ इति व्यक्तिस्फोटाः पञ्च वर्णपदवाक्यभेदेन जातिस्फोटास्त्रय इत्यष्टौ स्फोटा उक्ताः । तत्र जातिस्फोटत्रयं क्रमेण हरिणा दर्शितं यथा

“शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् । औपाधिको वा भेदोऽस्तु वर्णानां तारमन्द्रवत्” अयं भावः । वर्णास्तावदावश्यकाः उक्तरीत्या च सोऽयं गकार इति वत् योऽयं गकारः स्मृतः सोऽयं हकार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारोऽयं न हकार इत्यनापत्तेश्च । किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा आद्ये तदेव गकारोऽस्तु वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात् । तथा चातिरिक्तस्फोटकल्पन एव गौरवम् । अन्त्ये गकारादिप्रतीतिविरोधः । वायुसंयोगवृत्ति ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न प्रतीतेर्विना बाधकं भ्रमत्वासम्भवात् अस्तु वा वायुसंयोग एव गकारोऽपि तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन । तस्मात्सन्त्येव वर्णाः । परन्तु न वाचकाः गौरवात् । आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च । इदं हरिपदमित्यनुगतप्रतीत्या हर्य्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् । न च वर्णानुपूर्व्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः घटघटत्वादेरपि संयोगविशिष्ट-